पूर्ववार्षिकम्। अपरवार्षिकम्। पूर्वहैमनम्। [1]अपरहैमनम्। यत्र पञ्चमीनिर्देशो नास्ति 'जे प्रोष्ठपदानाम्[2]' (७.३.१८/१४०९) इत्येवमादौ, तदर्थमुत्तरपदाधिकारः। पञ्चमीनिर्देशेष्वपि विस्पष्टार्थम्, वृद्धेश्च व्यपदेशार्थम्। 'उत्तरपदवृद्धौ सर्वं च' (६.२.१०५/३८३९) [3]इति उत्तरपदाधिकारे [4]या वृद्धिः इत्येवं विज्ञायते॥

## अवयवादृतोः। (११/१३०७)

अवयववाचिनः[5] उत्तरस्य ऋतुवाचिनः उत्तरपदस्य च अचामादेः अचः [6]वृद्धिर्भवति तद्धिते ञिति, णिति, किति च [7]परतः। पूर्ववार्षिकम्। पूर्वहैमनम्। अपरवार्षिकम्। अपरहैमनम्। पूर्वं वर्षाणाम्, अपरं वर्षाणाम् इति एकदेशिसमासः। 'तत्र भवः' (४.३.५३/१४२८) इत्येतस्मिन्नर्थे 'वर्षाभ्यष्ठक्' (४.३.१८/१३८९), 'हेमन्ताच्च' (४.३.२१/३४५२), 'सर्वत्राण् तलोपश्च' (४.३.२२/१३९०) इत्यण् [8]प्रत्ययः। तत्र ऋतोर्वृद्धिमद्विधौ अवयवात् इति तदन्तविधिः। अवयवात् इति किम्? पूर्वासु वर्षासु भवम् पौर्ववर्षिकम्। 'कालाट् ठञ्' (४.३.११/१३८१) इति ठञ्। अवयवपूर्वस्यैव तदन्तविधिः, नान्यस्य॥

## सुसर्वार्धाज्जनपदस्य। (१२/१३०८)

सु सर्व अर्ध इत्येतेभ्यः उत्तरस्य जनपदवाचिनः उत्तरपदस्य अचामादेरचः[9] वृद्धिर्भवति तद्धिते ञिति, णिति, किति च [10]परतः। [11]सुपाञ्चालकः। सर्वपाञ्चालकः। [12]अर्धपाञ्चालकः। 'जनपदतदवध्योश्च' (४.२.१२४/१२४८), 'अवृद्धादपि बहुवचनविषयात्' (४.२.१२५/१३४९) इति वुञ्। सुसर्वार्धदिक्शब्देभ्यो जनपदस्य इति तदन्तविधिः॥

## दिशोऽमद्राणाम्। (१३/१३०९)

दिग्वाचिनः उत्तरस्य जनपदवाचिनो मद्रवर्जितस्य अचामादेरचः[13] वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। पूर्वपाञ्चालकः। [14]अपरपाञ्चालकः। दक्षिणपाञ्चालकः। पूर्ववत् तदन्तविधिः प्रत्ययश्च। दिशः इति किम्? पूर्वः पञ्चालानाम् पूर्वपञ्चालः, तत्र भवः पौर्वपञ्चालकः। आपरपञ्चालकः। अमद्राणाम् इति किम्? पौर्वमद्रः। आपरमद्रः। 'मद्रेभ्योऽञ्' (४.२.१०८/१३२९) इति अञ्प्रत्ययः॥

## प्राचां ग्रामनगराणाम्। (१४/१४००)

प्राचां देशे[15] ग्रामनगराणां दिश उत्तरेषाम् अचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। ग्रामाणाम्–पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः। अपरैषुकामशमः। पूर्वकार्ष्णमृत्तिकः। अपरकार्ष्णमृत्तिकः।

---

1. अपरहैमनम् नास्ति इ. 2. च इत्यधिकम् क. 3. इत्यत्र इ.ङ.ह. 4. च एषा अ.ब. 5. शब्दात् इत्यधिकम् क. इ. 6. स्थाने इत्यधिकम् इ. ह. 7. प्रत्यये इत्यधिकम् क. 8. प्रत्ययः नास्ति क. 9. स्थाने इत्यधिकम् क. 10. प्रत्यये इत्यधिकम् क. 11. सुपञ्चालेषु भवः इत्यधिकम् क. 12. अर्धपाञ्चालकः नास्ति क. 13. स्थाने इत्यधिकम् क. इ. 14. उत्तरपाञ्चालकः इ. ह. 15. ग्रामाणां नगराणां च क.